निर्मानमोहा जितसङ्गदोषा

अध्यात्मनित्या विनिवृत्तकामाः ।

द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैः

गच्छन्त्यमूढाः पदमव्ययं तत् ॥ १५.५ ॥

nirmānamohā jitasaṅgadoṣā
adhyātmanityā vinivṛttakāmāḥ |
dvandvairvimuktāḥ sukhaduḥkhasañjñaiḥ
gacchantyamūḍhāḥ padamavyayaṁ tat || 15.5||

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।

यद्गत्वा न निवर्तंते तद्धाम परमं मम ॥ १५.६ ॥

na tadbhāsayate sūryo na śaśāṅko na pāvakaḥ |
yadgatvā na nivartante taddhāma paramaṁ mama || 15.6||

ममैवांशो जीवलोके जीवभूतः सनातनः ।

मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ १५.७ ॥

mamaivāṁśo jīvaloke jīvabhūtaḥ sanātanaḥ |
manaḥṣaṣṭhānīndriyāṇi prakṛtisthāni karṣati || 15.7||

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।

गृहित्वैतानि संयाति वायुर्गंधानिवाशयात् ॥ १५.८ ॥

śarīraṁ yadavāpnoti yaccāpyutkrāmatīśvaraḥ |
gṛhitvaitāni saṁyāti vāyurgandhānivāśayāt || 15.8||